# संस्कृतवार्ता:

दिनाङ्क:-31.12.2025 18:20

<u>आदौ मुख्यवार्ता:</u>

- सर्वसमावेशकवृद्धिं सुनिश्चितं कर्तुं, आर्थिक-सुस्थितिस्थापनायै सुदृढीकरणाय च अस्मिन् वर्षे सर्वकारः ऐतिहासिका: निर्णया: स्वीकृतवान् इति सूचना-प्रसारण-राज्यमन्त्री डा. एल. मुरुगनः उक्तवान्।
- घनीभूत-कुहुज्झटिकया देशस्य उत्तरभागेषु सामान्यजीवनं बाधायमानमस्ति; कुहुच्छादित-वायुगुणवत्तया, न्यून-दृश्यतायाः च कारणेन सार्धैकशतप्रायः विमानयानानि निरस्तानि।
- विदेशमन्त्री डा. एस्. जयशङ्करः ढाका-नगरे बाङ्ग्लादेशस्य पूर्वप्रधानमन्त्रिणः बेगम् खालिदा जिया इत्यस्याः अन्त्येष्टिक्रियायां भागम् अगृह्णात्।
- CBSE इत्यनेन दशमद्वादश कक्षयोः बोर्ड परीक्षानां संशोधिततिथय: घोषिताः।
- परीक्षा पे चर्चा इत्येषः कार्यक्रमः इतिहासं रचयति, आगामि-संस्करणाय त्रि-कोट्यधिकानि पञ्जीकरणानि सञ्जातानि सन्तीति अस्ति सूचना।

---

<u>मुरुगन दैनन्दिनी प्रकाशनम्</u>

सूचना-प्रसारण-राज्यमन्त्री डा. एल्. मुरुगन् वर्यः अद्य अवदत् यत् अस्मिन् वर्षे सर्वकारः ऐतिहासिक-अभिनवपरिष्काराणां श्रृङ्खलां समारभत्, या हि विकसितभारत-विंशतिसप्तचत्वारिंशत् इत्यस्यस्य राष्ट्रिययात्रायां महत्त्वपूर्णः अध्यायः अस्तीति मन्त्री असूचयत्। नवदेहल्यां भारतसर्वकारस्य आगामि-वर्षस्य भारत @2026 इति पञ्चाङ्गस्य प्रकाशनं कुर्वन्, सः अधोरेखितवान् यत् एतेषां परिष्काराणां स्पष्टोद्देश्यं समावेशिन्याः प्रगतेः सुनिश्चयनेन सह आर्थिक-दृष्ट्या देशस्य दीर्घकालीनविकासस्य सुस्थिरः आधारः स्थापनमस्तीति।

अस्मिन् अवसरे, सूचना-प्रसारण-सचिवः सञ्जय् जाजुः अवदत् यत्, पञ्चाङ्गस्य विन्यासः अतीव सावधानतया परिकल्पितः अस्तीति।

---------------------------------------------------

## कुहका:-रेल एवं वायुसेवा

देशस्य उत्तरभागेषु कुहकाच्छादनकारणात् अद्य रेल- विमानसेवयोः सञ्चालनं प्रभावितम् अस्ति। रेल्-विभागस्य दिल्ली-विभागानुसारं दिल्ली-नगरं प्रति गच्छन्तः पञ्चाशत्तोऽधिकानि रेल-यानानि विलम्बेन प्रचलन्ति। तथैव, प्रतिकूल-वायुगुणवत्तायाः कारणेन विमानयात्रा अपि प्रभाविता अस्ति। सार्धैकशतप्रायः विमानयानानि निरस्तान्यपि।

---------------------------------------------------

## बाङ्ग्लादेश-खालिदा ज़िया

बुधवासरे ढाका-नगरस्य माणिक-मिया-एवेन्यू इत्यत्र सहस्रशः शोकाकुलाः जनाः समागताः, यत्र पूर्वप्रधानमन्त्री अथ बाङ्ग्लादेश्-नेषनलिस्ट्-पार्टी इत्यस्य अध्यक्षा च बेगम्-खालिदा-जिया इत्यस्याः राजकीय-अन्त्येष्टिक्रिया जाता। बाङ्ग्लादेशस्य प्रथमा महिला प्रधानमन्त्री खालिदा जिया दीर्घकालात् रोगैः ग्रस्ता आसीत् मङ्गलवासरे दिवङ्गता। तस्याः नमाज़-ए-जनाज़ा इति कार्यक्रम: राष्ट्रिय-संसद-भवनस्य दक्षिण-सभामण्डपे आयोजिताऽभवत्, यस्मिन् मुख्य-परामर्शकः प्रो.मुहम्मद् यूनुसः, अन्तरीम-सर्वकारस्य सदस्याः, अन्यराजनैतिकदलानां नेतारः, सशस्त्रसेना प्रमुखाश्च उपस्थिताः आसन्। भारतस्य विदेशमन्त्री डा. एस्. जयशङ्करेण सह नेपालस्य, श्रीलङ्कायाः, पाकिस्तानस्य, अन्यानाञ्च दक्षिण-दक्षिणपूर्व-एशियायाः देशानाम् प्रतिनिधयः अपि अन्तिमं सम्मानं दातुं तत्र उपस्थिताः आसन्।

---------------------------------------------------

## सी. बी. एस्. ई. दिनाङ्कः

केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड इति संस्थया अद्य दशम-द्वादशकक्षयोः बोर्ड-परीक्षयोः संशोधित-दिनाङ्कानां घोषणा कृता अस्ति। सी. बी. एस्. ई. इत्यनुसारं, दशमवर्गस्य परीक्षा, या पूर्वं अग्रिमख्रिष्टाब्दे मार्च्-मासस्य तृतीय-दिनाङ्कत: निर्धारिता आसीत्, सा अधुना अग्रिमे वर्षे मार्च्-मासस्य एकादशदिनाङ्कत: भविष्यति।

---

परीक्षा पे चर्चा-अभिलेखः

प्रधानमन्त्री-नरेन्द्र-मोदी-वर्यस्य प्रमुखः कार्यक्रमः **परीक्षा पे चर्चा** इति कार्यक्रमः ऐतिहासिकं सोपानं पारयत्, यत्र अद्यपर्यन्तं त्रि कोट्यधिकानि पञ्जीकरणानि अभिलेखितानि सन्ति। शिक्षा-मन्त्रालयः अवदत् यत्, सहभागितायाः परिमाणं **परीक्षा पे चर्चा** इत्यमुं यथार्थजन-आन्दोलनम् इति प्रकाशयति। कार्यक्रमस्य वर्धमान-लोकप्रियतां प्रतिबिम्बयन्, देशविदेशात् छात्राः, अभिभावकाः, शिक्षकाः च अत्यधिकं सहभागित्वं दर्शयन्तः सन्तीति।

---

राजनाथ/प्राणप्रतिष्ठाः

रक्षामंत्री राजनाथसिंहः अद्य राममन्दिरसङ्कुलस्य अन्नपूर्णा-मन्दिरे ध्वजारोहणं कृत्वा प्राणप्रतिष्ठायाः द्वितीयवार्षिक्याः अवसरे पूजायाम् सम्मिलितः अभवत्। अत्रावसरे श्रीसिंहेन सह उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथोऽपि आसीत्। राममन्दिर-परिसरस्य सप्तमन्दिरेषु अन्नपूर्णा-मन्दिरम् अन्यतममस्ति। गतमासस्य पञ्चविंशे दिनाङ्के, प्रधानमन्त्रिणा नरेन्द्रमोदिना राममन्दिरस्य उपरि काषायध्वजारोहणं कृतमासीत्।

---

डी. आर्. डी. ओ.-मिसैल्सः

रक्षा-अनुसन्धान-विकास-सङ्घटनम् इत्यनेन ओडिशा-तटस्य समीपे एकेनैव प्रक्षेपकेण द्रुतगत्या द्वयोः प्रलय-प्रक्षेपास्त्रयोः सातत्य-प्रक्षेपणम् सफलतया कृतम्। उपयोक्तृ-मूल्यांकन-परीक्षणस्य भागरूपेण उड्डयन-परीक्षणं कृतमासीत्। रक्षामन्त्रालयेन उक्तं यत् उभेऽपि प्रक्षेपास्त्रे सर्वाण्यपि

उड्डयनलक्ष्यानि साधयितुं अपेक्षितं पथम् अनुसरती, चण्डीपुरस्य एकीकृतपरीक्षाक्षेत्रे सफलताम् अभजताम्।

---------------------------------------------------

<u>मंत्रिमंडल-निर्णयाः</u>

महाराष्ट्र-राज्ये षट्प्रभागीयस्य नासिक्-सोलापुर्-अक्कल्कोट्-मार्गस्य निर्माणाय आर्थिककार्य-मन्त्रीणां समितिः अनुमतिं दत्तवती। पादोनचतुश्शत- किलोमीटरपरिमितः राजमार्गः प्रायः सार्धैकशतोत्तरैकोनविंशतिसहस्र- कोटि-रूप्यकाणां व्ययेन निर्मितः भविष्यति। नवदेहल्यां अद्यतनस्य मन्त्रिमण्डलस्य निर्णयानाम् विषये प्रसारमाध्यमान् सम्बोधयन् सूचना-प्रसारण-मन्त्री अश्विनी वैष्णवः अवदत् यत्, नासिक-सोलापुर-अक्कल्कोट्-मार्गप्रकल्पः नासिक, अहिल्या-नगर- सोलापुर-इत्यादीनां महत्त्वपूर्णानां क्षेत्रीयनगराणां कृते कुर्नूल-नगरेण सह सम्पर्कं कल्पयिष्यतीति। प्रधानमन्त्री गतिशक्ति-राष्ट्रिय-बृहत्-योजनायाः सिद्धान्तान्तर्गतं एकीकृत-परिवहन-सौकर्याभिवृद्धये एतत् महत्त्वपूर्णं सोपानम् अस्तीति।

केन्द्रीयमन्त्रिमण्डलेन ओडिशा-राज्ये राजमार्गसंख्या-षड्विंशत्युत्तरत्रिंशतम् इत्यस्य परिष्काराय अपि आर्थिकानुमतिः प्रदत्ता। श्रीवैष्णवः अवदत् अस्य राजमार्गस्य उन्नयनेन गजपति, रायगढ, कोरापुट् इत्येतानि महत्त्वाधायीनि-जनजातीय-मण्डलानि महल्लाभं प्राप्यस्यन्तीति।

---------------------------------------------------

<u>स्वास्थ्य/निमस्युलायड-निषेधः</u>

सर्वकारेण शत-मिलीग्राम इत्यतः अधिकानां निमेसुलाइड्-युक्तानां सर्वेषां मुखग्राह्यौषधीनां तत्क्षणप्रभावेन निर्माण-विक्रयण- वितरणञ्च निषिद्धम्। स्वास्थ्य-परिवार-मन्त्रालयेन राजपत्र-अधिसूचनायां उक्तं यत् औषध-तान्त्रिक-परामर्श-मण्डलस्य परामर्शेण एतत् कार्यम् विहितमस्तीति।

---------------------------------------------------

<u>रेल-वन्देभारत-शयनयान</u>

भारतीय-रेल्-संस्थया स्वदेशीरूपेण परिकल्पितं निर्मितं च वंदेभारत्-स्लीपर्-रेल इति यानस्य अन्तिमं द्रुतगति-परीक्षणं सफलतया सम्पन्नम्। परीक्षणञ्च कोटा-नग्दा-खण्डे कृतम्, यस्मिन् रेलयानं प्रतिघण्टानुसारं अधिकतमं अशीत्यधिकैकशत-कि. मी. इति वेगम् अवाप्नोत्।

।।इति वार्ता:।।